International Journal of Sanskrit Research 2015; 1(3): 63-64

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2015; 1(3): 63-64
© 2015 IJSR
www.anantaajournal.com
Received: 13-01-2015
Accepted: 18-02-2015

डॉ0 स्नेहलता
व्याख्याता, एस. पी. एस. सेमिनरी
+2 स्कूल, सोनपुर, बिहार, भारत

Corresponding Author:
डॉ0 स्नेहलता
व्याख्याता, एस. पी. एस. सेमिनरी
+2 स्कूल, सोनपुर, बिहार, भारत

# रत्नावल्यां रस परिपाकः अलंकार-छन्द योजना च

डॉ0 स्नेहलता

## प्रस्तावना

संस्कृतसाहित्ये हर्षवर्धनस्य महत्त्वपूर्णं स्थानम् अस्ति । अयं भारतस्य प्रसिद्धः सम्राट् तथा कान्यकुब्जेश्वरः आसीत् । हर्षवर्धनेन रचिताः तिस्रः नाट्यकृतयः प्राप्यन्ते– 'प्रियदर्शिका, रत्नावली नागानन्दश्च ।

रत्नावली महाराजहर्षस्य सुप्रसिद्धा नाट्यकृतिः अस्ति । नाट्यशास्त्रीय दृष्ट्या इयं नाटिका अस्ति । अत्र राज्ञः उदयनस्य सिंहलदेशस्य च राजकुमार्याः रत्नावल्याः (सागरिकायाः) प्रणयस्य परिणयस्य च वर्णनम् अस्ति । अस्याः प्रतिपाद्यं प्रेमाख्यानकं चतुर्षु अङ्केषु प्रतिपादितम् अस्ति । प्रथमाङ्कस्य नाम मदनमहोत्सवः द्वितीयस्य कदली गृहम्, तृतीयस्य सङ्केतः चतुर्थस्य इन्द्रजालिकश्चास्ति ।

यत्र शास्त्रे नाट्यसौन्दर्यस्य परीक्षणं मूल्यांकनं तत् शास्त्रं नाट्यशास्त्रं कथ्यते । अत्र नाट्यतत्त्वानां निरूपणस्य कृते नाट्यसिद्धान्तानां मानदण्डः प्रयुज्यते । भारतीयनाट्यसिद्धान्तानुसारं रूपकस्य तीणि तत्त्वाणि सन्ति – वस्तु, नेता रसश्च । वस्तु इत्यस्य अभिप्रायोऽस्ति इतिवृत्तम कथा वस्तु वा । नेतृ (नेता) तत्त्वान्तर्गतं पात्राणाम् अर्थात् नायक-नायिकानां विविध प्रकाराणां विवेचनं भवति । रसं भवानां नवरसानां च निरूपणं क्रियते ।

रत्नावल्यां प्रधानरसः संभोगश्रृंगारोऽस्ति, किन्तु विप्रलम्भस्यापि वर्णनं प्राप्यते । संभोग श्रृंगारस्य लक्षणम् इदम् अस्ति ।

''दर्शनस्पर्शनादीनि निषेवेते विलासिनौ ।
यत्रानुरक्तावन्यौन्यं संभोगोऽप्युदाहृता ।।''[1]

अस्याः प्रथमाङ्के वसन्तोत्सवस्य कामार्चनस्य च दृश्ययोजना श्रृंगारिक वातावरणम् उपस्थितं करोति । चित्रस्थायाः सागरिकायाः सौन्दर्यवर्णने श्रृंगारस्य परिपाकोऽस्ति । आलम्बनः विभावरूपे नायिकायाः वर्णनम् अस्ति ।

''विधायापूर्वपूर्णेन्दुमस्या मुखमभूद्ध्रुवम् ।
धाता निजासनाम्भोजविनिमीलन्दुः स्थितः ।।[2]

सागरिकायाः उदयनस्य च विरहव्यथायाः वर्णने विप्रलम्भश्रृंगारः परिपुष्टः सञ्जातोऽस्ति । विदूषकस्य उक्तिभिः हास्यरसस्य अवतारणा अस्ति। संग्रामवर्णने वीररसस्य अभिव्यक्तिः अपि शोभना अस्ति ।

''अस्त्रव्यस्तशिरस्त्रशस्त्र कषणोत्कृत्तोत्तमाङ्गे क्षणं
व्यूढ़ासृक्सरिति स्वनत्प्रहरणे वर्मोद्दलद्वह्निानि ।।

आहूयजिमुखे सकोसलप्रतिर्भङ्गप्रतीपीभवे-
न्नेकेनैव रुमण्वता शत्शतैर्भत्तद्विपस्थो हृत: ।।[3]

अस्यां नाटिकायां द्वेवर्णने भयानकरसस्य स्त: प्रथम: राजकीयवानरस्य उन्मुक्तत्त्वात् सर्वे इतस्तत: पलायन्ते ।

''कण्ठे कृत्तावशेषं कनकमयध: शृखलादाम कर्ष-
न्क्रान्त्वा द्वाराणि हेलाचलचरणणत्किङ्किणीचक्रवाल: ।
दत्तातङ्कोडङ्गनानामनुसृतसरणि: संभ्रमादश्वपालै:
प्रभष्टोऽयं प्लवङ्गप्रविशति नृपतेर्मन्दिरं मन्दुराया: ।।[4]

- **भयानकरसस्य द्वितीय: उदाहरणम्–**

''हर्म्याणां हेमशृङ्गश्रियमिव निचयैरर्चिषामाद धान:
सान्द्रोधनद्रुमाग्रप्लपन पिशुनितात्यन्त तीव्राभिताप: ।
कुर्वन्क्रीडामहीघ्रं सजलजलधरश्यामलं धूमपातै-
रेषप्लोषार्त योषिज्जन इह सहसैवोत्थितोऽन्त: पुरेऽग्नि ।।[5]

- **अलङ्कारयोजना–**

अलङ्कारयोजनया भाषायां सौन्दर्यम् आयाति । रत्नावल्याम् अलङ्काराणां स्वाभाविकप्रयोग: दृश्यते । अभिष्टार्थस्य अभिव्यञ्जनायाम् अङ्लकारा: सहायक सिद्धा: सन्ति । सन्ध्यावर्णनप्रसंगे वासवदत्ताया: सौन्दर्यस्य वर्णनं कुर्वन् गच्छति सन्ध्या चापि उचितरूपेण वर्ण्यते–

''देवि त्वन्मुखपङ्कजेन शशिन: शोभातिरस्कारिण:
पश्यब्जानि विनिर्जितानि सहसा गच्छन्ति विच्छायताम् ।
श्रुत्वा त्वत्परिवारवारवनितागीतानि भृङ्गाङ्गना
लोयन्ते मुकुलान्तरेषु शनकै: सञ्जातलज्जा इव ।।[6]

अत्र प्रतीयमानोत्प्रेक्षा अलङ्कारस्य प्रयोग: विहितोऽस्ति । सन्ध्यासमयोऽस्ति सायंकाले कमलानि स्वभावत: श्री हीनानि भवन्ति परन्तु कवि: उत्प्रेक्षया तानि वासवदत्ताया: मुखेन पराजितानि निर्दिशन्ति ।

- **उपमारूपकालङ्कारयो: एकत्र प्रयोग: द्रष्टयोऽस्ति–**

''लीलावधूतपदमा कथयन्ती पक्षपातमधिकं न: ।
मानसमुपैति केय चित्रगता राजहंसीव ।।[7]

- **उपमाया: एकं शोभनम् उदाहरणं प्रस्तूयते यत्र कवि: सूक्ष्मनीरिक्षणशक्ति: प्रतीयते–**

''उदयतटान्तरितनियं प्राची सूचयति दिङ्निशानाथम् ।
परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी ।।[8]

- **सौन्दर्यस्य वर्णनं कुर्वन् कवि: काक्ध्वन्या समस्तसौन्दर्यम् अभिव्यञ्जितं करोति–**

''किं पद्मस्य रूचं न हन्ति नयनानन्दं विधत्तेन किं
वृद्धिं या झषकेतनस्य कुरुते नालोकमात्रेण किम् ।।
वक्तेन्द्रौ तव सत्ययं यदपर: शीतांशुरभ्युद्यतो
दर्प: स्यादमृतेन चेदिह तदप्यस्त्येव बिम्बाधरे ।।''[9]

**छन्दयोजना–**

रत्नावल्यां भावानुकूलानि छन्दांसी प्रयुक्तानि सन्ति । तत्र गति: अस्ति । क्वचित्-गीतिकाव्यस्य इव आनन्दानुभूति: भवति । छन्दसां प्रयोगेण संगीतात्मकता लयात्मकता च भवत: । रत्नावल्यां पञ्चदश निम्नांकितानि छन्दांसि प्रयुक्तानि सन्ति ।

(1) शालिनी छन्द:
(2) हरिणी छन्द:
(3) वसन्ततिलका छन्द:
(4) शिखरिणी छन्द:
(5) पृथ्वी छन्द:
(6) उपजाति छन्द:
(7) आर्या छन्द:
(8) अनुष्टुप छन्द:
(9) प्रहर्षिणी छन्द:
(10) मालिनी छन्द:
(11) स्रग्धरा छन्द:
(12) शार्दूलविक्रीडतम् छन्द:
(13) इन्द्रवज्रा छन्द:
(14) उपेन्द्रवज्रा छन्द: ।
(15) पुष्पिताग्रा छन्द: ।

अनेन प्रकारेण इदं वक्तुं शक्यते यत् रत्नावली एका विशिष्टा सफला च नाटिका अस्ति । साहित्यशास्त्रे अस्या: नाटिकाया: सरपरिपाके तथा अलङ्कारछन्दयोजनायाम् प्रभूतानि उदाहरणानि प्राप्यन्ते ।

**सन्दर्भ-सूचि :-**


1. डा0 रमेश कुमार झा रत्नावली पृ0सं0-30
2. हर्षवर्धन: तदेव पृ0सं0 2/10
3. हर्षवर्धन: तदेव पृ0सं0 4/6
4. हर्षवर्धन: तदेव पृ0सं0 2/2
5. हर्षवर्धन: तदेव पृ0सं0 4/14
6. हर्षवर्धन: तदेव पृ0सं0 1/26
7. हर्षवर्धन: तदेव पृ0सं0 2/9
8. हर्षवर्धन: तदेव पृ0सं0 1/25
9. हर्षवर्धन: तदेव पृ0सं0 3/13